# Vishvamitrakritam Shiva Stotram

# विश्वामित्रकृतं शिवस्तोत्रम्

## Document Information

Text title : Vishvamitrakritam Shiva Stotram

File name : vishvAmitrakRRitaMshivastotram.itx

Category : shiva, skandapurANa, stotra, aShTaka

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 6/7-14||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2025

*sanskritdocuments.org*

# विश्वामित्रकृतं शिवस्तोत्रम्

विश्वामित्र उवाच ।
जय देव जयाचिन्त्य जय पार्वतिवल्लभ ।
जय कृष्ण जगन्नाथ जय कृष्ण जगद्गुरो ॥ १॥

जयाचिन्त्य जयामेय जयानन्त जयाच्युत ।
जयामर जयाजेय जयाव्यय सुरेश्वर ॥ २॥

जय सर्वग सर्वेश जय सर्वसुराश्रय ।
जय सर्वजनध्येय जय सर्वाघनाशन ॥ ३॥

त्वं धाता च विधाता च त्वं कर्ता त्वं च रक्षकः ।
चतुर्विधस्य देवेश भूतग्रामस्य शङ्कर ॥ ४॥

यथा तिलस्थितं तैलं यथा दधिगतं घृतम् ।
तथैवाधिष्ठितं कृत्स्नं त्वया गुप्तेन वै जगत् ॥ ५॥

त्वं ब्रह्मा त्वं हृषीकेशस्त्वं शक्रस्त्वं हुताशनः ।
त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्दुस्त्वं दिवाकरः ॥ ६॥

अथवा बहुनोक्तेन किं स्तवेन तव प्रभो ।
समासादेव वक्ष्यामि विभूतिं श्रुतिनोदिताम् ॥ ७॥

यत्किञ्चित्त्रिषु लोकेषु स्थावरं जङ्गमं विभो ।
तत्सर्वं भवता व्याप्तं काष्ठं हव्यभुजा यथा ॥ ८॥

इति श्रीस्कन्दपुराणे नागरखण्डे षष्ठाध्यायान्तर्गतं
विश्वामित्रकृतं शिवस्तोत्रं समाप्तम् ।

स्कन्दपुराण । नागरखण्ड । अध्याय ६/७-१४॥

skandapurANa . nAgarakhaNDa . adhyAya 6/7-14..

Proofread by PSA Easwaran

*Vishvamitrakritam Shiva Stotram*

pdf was typeset on August 24, 2025

Please send corrections to *sanskrit@cheerful.com*